Regd. No. KA/SK/MYS-107/2015-17
R.N.I. No. 20007/70

स्थापना : 1970

E-mail-sudharma.sanskritdaily@gmail.com
E-paper-sudharma.epapertoday.com
Website-www.sudharmasanskritdaily.in

# सुधर्मा

संस्थापकसम्पादकः
गीर्वाणवाणीभूषणं विद्यानिधिः
पण्डित कळले नडादूरु वरदराजय्यङ्गार्यः

केन्द्र-कर्णाटकसर्वकाराभ्यां पुरस्कृता अद्वितीया संस्कृतदिनपत्रिका
SUDHARMA-THE ONLY SAMSKRITHA DAILY

सम्पुटः-४७ सञ्चिका -७२ मैसूरु  श्रीदुर्मुखीनामसंवत्सरे दक्षिणायणे शरदृतौ आश्वयुजशुक्ल प्रतिपदादि चतुर्दश्यां उत्तराभाद्रानक्षत्रयुक्त शनिवासरः १५ अक्टोबर २०१६  मूल्यम्: ₹ १.२५

## सुभाषितम्

**त्यज दुर्जनसंसर्गं भज साधुसमागमम् ।**
**कुरु पुण्यमहोरात्रं स्मर नित्यमनित्यताम् ।।**

*O ,am, give up the company of the evil people, go to the fold of the nolbe ones, do good deeds every day and night and remember God because the world will perish one day.*

(कौटिल्यस्य नयः -१४)

## योग एव शान्तिदायकः

जगति शान्तिं प्रतिष्ठापयितुं बहवो बहुधा प्रयत्नं कुर्वन्ति । यदि सर्वत्र योगविद्या बोध्यते तर्हि शान्तिः प्रतिष्ठापिता भविष्यति । जनैः पतञ्जलेः उपदेशानुसारेण मैत्रीकरुणामुदितोपेक्षाणां भावना कर्तव्या । योगासनप्राणायामध्यानानाम् अभ्यासः कर्तव्यः, वैराग्यं चाश्रयणीयम् । एवं कृते चित्तप्रसादनं सर्वेषां सेत्स्यति । जनाः स्वेच्छया स्वधर्मम् अनुसरन्तु । सर्वैर्वैदिको धर्म आश्रयणीय इति नाग्रहः । केचन नास्तिका अपि स्युः । तत्रापि नास्माकं विरोधः । किन्तु सर्वैः सत्याहिंसास्तेयब्रह्मचर्या परिग्रहाः अनुसरणीयाः । एतेषाम् अनुष्ठानं धर्मः सार्वत्रिकः। न कोऽपि आचार्यः प्रवादी वा '**असत्यं वद**', '**हिंसां कुरु**', '**स्तेनो भव**', '**परदारान् आमृश**', '**दत्तं सर्वं परिगृहाण**' इति वदति । आराधनं विष्णोः शिवस्य मातुः अन्यस्य वा भवतु नाम । तत्र दोषो नास्ति ।

उग्रवादिभिः नरकीकृते सिरियादेशेऽपि इदानीं योगाभ्यास आरब्धः। जीवनकला *(Art of living)* संस्थायाः शान्तिदूतास्तत्र योगसन्देशं प्रसारयन्ति । इदानीं तत्र नागरिकाः योगं बोध्यन्ते । क्रमश उग्रवादिनाम् अपि तत्राकर्षणम् उत्पद्यते इत्याशयोऽस्ति । योग एवाद्यतने प्रपञ्चे आशाकिरणः। सर्वे मानवा योगिनो भूयासुः। अहंकारं परित्यज्य विवेकं लभिषीरन् । तदा रागद्वेषयोर्निरासो भविष्यति । तादृशे प्रपञ्चे सर्वे शान्त्या वस्तुं शक्ष्यन्ति । युद्धभीतिः स्वयम् अपगमिष्यति ।

## संसदः शैत्यकालीनमधिवेशनम्

नवदिल्ली-लोकसभा राज्यसभयोः शैत्यकालीनं संसदधिवेशनं नवम्बर मासस्य १६ दिनाङ्कतः डिसम्बर मासस्य षोडशतम दिनाङ्कं यावत् प्रचलिष्यति। संसदीयव्यवहार सम्पुटसमितिपदाधिकारिणः अधिवेशनस्य वेलापट्टिकां गुरुवारे बहिः प्रकटयामासुः। यद्यपि शैत्यकालीनमधिवेशनं नवम्बर मासस्य तृतीयवासरे अथवा चतुर्थवासरे आरप्स्यते अथापि देशस्य आर्थिकाभिवृद्ध्यै भूतलस्य शासननियमस्य अन्तिमस्वरूपं प्रदातुं अधिवेशनं निश्चिवेला-पट्टिकातः प्रागेव निश्चितमस्ति। आभारतं यावतख एकरूपं कदप्रदानं शासनपथम् आगच्छेदिति केन्द्र प्रशासकाः चिन्तयन्तस्सन्ति। एक-रूपपरोत्रकरप्रदानपद्धतिं २०१७ वर्षस्य एप्रिल्मासस्य प्रथम दिनाङ्कतः कार्यपथमानेतुं केन्द्र-प्रशासनेन निश्चितमस्ति। अद्य देशे अनेके समस्याः सन्ति। विदेशेभ्यः शत्रवः अक्रमेण भारतं प्रविश्य भारतनागरिकाजनान् रहसि मारयन्ती वर्तन्ते। तानि दुष्कृत्यानि प्रशासकाः दूरीकुर्यासुः। सर्वे एकीभूय देश-रक्षणाय कार्याणि कुर्युरिति सदाशयो विद्यते प्रशासकेषु ।

### अर्थशास्त्रविषये नोबेलप्रशस्तिः

स्टाकहोम्-ब्रिटन्देशस्य अर्थ-शास्त्रज्ञः आलिवरहार्टः तथा फिन्लेण्ड्देशस्य अर्थशास्त्रज्ञः बेङ्गोल्मस्ट्रामः च ऐषमः अर्थ-शास्त्रविषये नोबेलप्रशस्ति लब्धवन्तौ। उन्नतपदेषु स्थितानां जनानां कार्यदक्षताधारितवेतनं धन-स्थापनं सर्वकारवलयस्य उत्पादन क्रियाकलापः चेत्यादयः विचाराः आभ्यां विश्लेषिताः आसन्। एतौ उभावपि प्रशस्तेः मूल्यं समानतया विभज्य स्वीकुर्वन्ति। नदशोत्तरषट् कोटिरूप्यकाणि ताभ्यां लभ्यन्ते।

## बुद्धिजीविनो धर्मविरोधिनः

उडुपि-पर्यायपीठाधिरूढाः पेजावर-मठाधीश्वराः श्रीविश्वेशतीर्थश्रीपादाः अब्रुवन् ''राजकीयनेतारो न धर्म-विरोधिनः। अपि तु तथाकथिताः बुद्धिजीविनः एव धर्मविरोधिनः। तैः प्रचोदिताः केचन कृष्णमठाक्रमणं करिष्याम इति वदन्ति । तथा करिष्यन्ति चेत् अहं करिष्यामि उपवासम् । निष्कारणं केचन मां द्विषन्ति । गोनयनप्रसङ्गेः जातायाःनरहत्यायाः कृष्णमठस्य च कोऽपि सम्बन्धो नास्ति । तथापि सोद्देशं केचन विरोधोत्पादने आसक्ताः'' इति ।

भूतपूर्वः उपमुख्यमन्त्री श्रीमान् आर्. अशोकः कृष्णमठम् आगत्य श्रीकृष्णदर्शनं प्राप्नोत्। ततः श्रीविश्वेश्वरतीर्थ श्रीपादेभ्यः सः अनुग्रहमन्त्राक्षतान् स्वीकृतवान् ।

## अमेरिकादेशस्य बाब्डैलन् नोबेल् प्रशस्तिभाक्

वाषिङ्गटन्-सामाजिकाशान्ति-निवारणाय युद्धानि मास्तु शान्तिरस्तु इति क्रान्तिगीतानि संगीय समाजोन्नत्यै श्रमितवान् अमेरिका देशस्य गीतरचनाकार। सङ्गीत-लोकस्य अद्वितीयविद्वान् बाब्डैलन् अस्मिन् वर्षे नोबेल्साहित्यप्रशस्तिं समलभत। नोबेल्साहित्यप्रशस्ति-मस्मै प्रदातुं नोबेल्प्रशस्तिसमिति सदस्याः निश्चयामासुः। अमेरिका देशस्य गायनसंस्कृतेरन्तः नूतनामेकां काव्यात्मिकामभिव्यक्तिं सृष्टवानिति तस्मै प्रशस्तिमिमां प्रदातुं निर्णयोऽङ्गीकृतः। प्रशस्तिम् इमां प्रथमवारं गीतरचनाकाराय सङ्गीतकर्त्रे प्रदातुं सङ्कल्पः कृतः। Blovin in the wind, The Times they are a changing इत्येते गीते अमेरिकानागरिक युद्धविरोध्याक्रमण क्रान्ति गीते स्तः। बाब्डैलन् १९४१ वर्षे मिनेसोटस्य डुलत् नामके ग्रामे जनिमलभत । बाल्यादेव स्वयमेव हार्मोनियं गिटार् पियोनो वादयितुं प्रयतितवान्। बाब् डैलनाय नोबल्प्रशस्तिना साकं ६.०६ कोटिप्रमाणकं डालर्धनं बहुमानधनं प्रदास्यते। आल्फ्रेड् नोबेल्स्य पुण्यतिथिस्मरणाय २०१६ डिसम्बर१० दिनाङ्के स्टाक् होम्नगरे नोबेल्प्रशस्तिप्रदान समारम्भः प्रचलिष्यति। तत्र अस्मै २०१६ वर्षस्य नोबेल्साहित्य प्रशस्तिः प्रदास्यते ।

## मद्यत्यागे कृते जीवनं सुवर्णम्

मैसूरु-भूतपूर्वमन्त्री श्रीमान् श्रीनिवासप्रसादः धर्मदीक्षास्वीकार स्मरणसमारम्भे भाषमाणोऽब्रवीत् ''दलिताः यदि प्रतिकुटुम्बं शिशुद्वयं प्राप्नुवन्ति, तयोः शिक्षणं च यदि प्रकल्पयन्ति, यदि च मद्यपानं दूरी कुर्वन्ति तर्हि तेषां जीवनं सुवर्णमयं भविष्यति'' इति । शुक्रवासरे स एतत्सम्बन्धे उपन्यासकार्यक्रमम् उद्घाटितवान्।

यदि अधिकाः शिशवो जायन्ते, तर्हि तेभ्यः उत्तमं शिक्षणं दापयितुं मातापितरौ न शक्नुतः इति सोऽब्रवीत् ।

## अष्टादशसहस्रशिक्षकाणां नियुक्तिः

बेङ्गळूरु-आगामिनि वर्षद्वये अष्टादशसहस्रसंख्यानां शिक्षकाणां नियुक्तिः करिष्यते इति प्रौढशिक्षण मन्त्री श्रीमान् तन्वीर्सेठ् अत्र अवदत्। शुक्रवासरे मुख्यमन्त्री श्री सिद्धरामय्यः शिक्षणविभागस्य प्रगतिपरिशीलनाम् अकरोत्। सभानन्तरं पत्रकारगोष्ठ्यां श्रीतन्वीर् सेठ् इत्थम् अब्रवीत्। सद्यः कर्णाटकराज्ये शालासु चतुर्दशसहस्र शिक्षकस्थानानि रिक्तानि सन्ति । एवं शिक्षणप्रगतिः कुण्ठिता ।

## अश्विनस्य साधना

इन्दोर्-भारतस्य प्रख्यातः वक्रकन्दुकक्षेप्ता आर्.अश्विनः नूतन विक्रमं साधितवान्। सः सम्प्रति समाप्तायां भारतन्यूजिल्याण्ड्देशयोः क्रिकेट्क्रीडायां सरणिश्रेष्ठप्रशस्तिं श्रेष्ठ क्रीडापटुप्रशस्तिं च लब्धवान्। सः अन्तिमक्रीडायां त्रयोदशाहुतिं स्वकार्षीत् । तथैव एकस्यामेव क्रीडायां सः द्वादशाधिकाहुतिं स्वीकृत्य विक्रमं संसाधितवान् वर्तते।

## सर्वत्र श्रीरामस्य चित्रमस्तु

चित्रदुर्गम्-द्वारकापीठस्य जगद्गुरवः श्री स्वरूपानन्दसरस्वती स्वामिनोऽवदन् ''**सर्वासु पाठशालासु श्रीरामस्य चित्रं विराजताम्**'' इति। चित्रदुर्गस्योद्यमिनः श्रीचिदानन्दरेड्डि वर्यस्य गृहे पूजां स्वीकृत्य पत्रकारा गोष्ठ्यां भाषितवन्तः श्रीचरणाः भारतदेशे गोहत्यां निषेधनीया इति अब्रुवन् । हिन्दुविद्यार्थिनो रामायणं महाभारतं भगवद्गीतां च पठेयुः, तदर्थं सर्वकारेण यत्नः कर्तव्यः इति च ते न्यगदन्। भयोत्पादकेभ्यः प्रोत्साहं ददानस्य पाकिस्थानस्यो-परि युद्धघोषणा अनिवार्येति च श्रीचरणा अभिप्रयन्ति ।

## वाल्मीकिजयन्ती

बेङ्गळूरु-अद्य वाल्मीकिजयन्ती आचर्यते । आदिकाव्यस्य रामायणस्य कर्ता वाल्मीकिः शाश्वतं साहित्यं निर्ममे । वाल्मीगिरिसम्भूता रामसागरगामिनी पुण्या पुनातु गङ्गेव रामायणमहानदी।

## पवित्रस्थले मद्यपानम्

महदेश्वरशैलः-अस्मिन् पवित्र-क्षेत्रेऽपि केचन चौर्येण मद्यविक्रयणं कुर्वन्ति। स्थलीयाः, केचन आगन्तुका भक्ताश्च मद्यं क्रीत्वा यथेच्छं पिबन्ति। एवं क्षेत्रस्य पवित्रता विनश्यतीति केषाञ्चित् भीतिः। अव्याहतरूपेण मद्यपानं प्रवर्तते इति प्रत्यक्षदर्शिनां कथनम् । अधिकृतो मद्यापणो नास्त्यत्र। समीपस्थेषु ग्रामेषु मद्यव्यवहारोऽधुना रभसेन जायते। तत्र क्रीत्वा शैलस्योपरि विक्रयणेन मध्यगाः धनलाभं कुर्वन्ति । सर्वकारोऽस्य दुर्व्यवहारस्य स्तम्भनं करोतु ।

## श्रीचामुण्डाम्बिकायाः रथोत्सवः

मैसूरु -अद्य शनिवासरे प्रातः सार्धदशवादनानन्तरं संभविष्यमाणे शुभलग्ने श्री चामुण्डाम्बिकायाः वार्षिकब्रह्मरथोत्सवः प्रचलिष्यति। अस्मिन् सन्दर्भे राजवंशस्थः महाराणी श्रीमती प्रमोदादेवी, यदुवीरकृष्णदत्त चामराजवोडेयर तथा धर्मपत्नी श्रीमती त्रृषिकाश्च प्रथमापूजां च करिष्यति ।